# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| **कक्षा – शास्त्री** | **प्रश्नपत्रम् – ६** | **गुणाः – ५०** |
| **विषयः – स्वामिनारायणवेदान्तः(S)** | **सत्रम् – ६** | **समयः – १०:०० तः १२:००** |
| **दिनाङ्कः – १९/०७/२०२१** | **सन्दर्भग्रन्थः – भद्रेशस्वामिविरचितमुण्डकोपनित्-स्वामिनारायणभाष्यम्** | |

सूचना - **निम्नलिखितेषु दशप्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्यां कुरुत।**

१ तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।
अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्।।

२ एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति।
प्रियां वाचम् अभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः।।

३ तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्राऽमृतः स पुरुषो ह्यव्ययात्मा।।

**प्रश्नः २ मन्त्रानुसारेण ब्रह्मविद्यायाः व्याख्या विस्तरेण कर्तव्या।**

**प्रश्नः ३ पराविद्या विवर्ण्यताम्।**

**प्रश्नः ४ अधोलिखितेषु द्वयोः व्याख्यां कुरुत।**

१ पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्।
एतद् यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य।।

२ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।।

३ यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः।
तमेवैकं जानथाऽऽत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः।।

**प्रश्नः ५ परब्रह्म जगदुत्पत्तिहेतुः इति यथाग्रन्थं निरूपयतु।**

**प्रश्नः ६ अक्षरं ब्रह्म वेद्धव्यम् इति दृष्टान्त-सिद्धान्तं निरूपयतु।**

**प्रश्नः ७ अधोलिखितेषु द्वयोः व्याख्यानं कुरुत।**

१ स वेदैतत् परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्।
उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः।।

२ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवास्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः।।

३ सत्येन लभ्यस्तपसा ह्येषा  आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम्।
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः।।

**प्रश्नः ८ अक्षरब्रह्मपरब्रह्मणोः जीवहृदयान्तर्वर्तित्वं निरूपयतु।**

**प्रश्नः ९ परमात्मलाभस्य महिमानं मन्त्रद्वयेन वर्णयतु।**

**प्रश्नः १० दशानाम् प्रश्नानां  लघूत्तराणि लिखत।**

१ द्वा सुपर्णा सयुजा सखाया इति मन्त्रे सुपर्णौ इत्यनेन किं ग्राह्यौ?

२ निरञ्जनः इत्यस्य कोऽर्थ?

३ अक्षरब्रह्मः कति स्वरूपाणि मुण्डकोपनिषदि उल्लिखितानि?

४ मुण्डकोपनिषदुक्तां ब्रह्मविद्यां कः कस्मै प्रददाति?

५ श्रोत्रियम् इति किम्?

६ धनुः शरदृष्टान्ते शरः इति किम्?

७ भुवनस्य गोप्ता इत्यर्थः कः?

८ येनाऽक्षरं पुरुषं वेद इत्यस्मिन् मन्त्रे पुरुषशब्देन किं ग्राह्यम्?

९ भुवनस्य गोप्ता इत्यर्थः कः?

१० अक्षरात्परतः परः कः?

११ द्वितीयमुण्डके कस्य जगत्कारणत्वं कथितम्?

१२ 'महत्पदम्' इति शब्देन अक्षरब्रह्मणः किं स्वरूपं ग्राह्यम्?

१३ वीतशोकः इति जीवन्मुक्तः वा विदेहमुक्तः वा?

१४ परावरः इति कः?

१५ आत्मक्रीडः शब्दस्य विग्रहं कुरुत।

****